महाराष्ट्रधर्ममन्दिरे नन्दादीपः ।

शारदा

आषाढ १८९०

जुलै १९६८

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

संपादकीयम्

महराष्ट्रधर्ममन्दिरे नन्दादीपः ।

भारतवर्षे महाराष्ट्रभूमिः धर्मक्षेत्रम् । अत्र भक्तिः प्रधाना शक्तिः । श्रद्धा संजीवनी । धर्मोपासना पौष्टिकं जीवनसत्त्वम् । अत्र धर्मः भागवतधर्मः । परमकारुणिकस्य भगवतः पाण्डुरङ्गस्य, विट्ठलस्य नामसंकीर्तनं विशिष्टं व्यसनम् । ईशस्मरण-पूजन-भजन-कीर्तन-व्यसनिनाम् अयं संप्रदायः वारकरीसंप्रदायः । लक्षशः तत्र अनुयायिनः । ब्राह्मणाः, वणिजः, कृषीवलाः, स्त्रियः, पुरुषाः, अन्धाः, बधिराः, मूकाः, श्रीमन्तः, दरिद्राः । सर्वेषाम् एकम् एव गन्तव्यं पण्ढरपुरम् । पण्ढरपुरं गत्वा केवलं विट्ठलमन्दिर-शिखरं दृष्ट्वा अपि समाधानम् । किं पुनः रुक्मिणीसहितस्य तस्य भगवतः प्रत्यक्षदर्शनेन । भारतवर्षे नान्यत्र एतादृशं भक्तिसागरदर्शनम् ।

भागवतधर्मप्रणेता ज्ञानदेवीकर्ता भगवान् ज्ञानेश्वरः । भक्तशिरोमणिः तुकारामः भागवतधर्मशिखरम् । गतवर्षाणां शताष्टकं महाराष्ट्रमण्डले भागवतधर्मसाम्राज्यम् । अस्मिन् शतके तस्मिन् भागवतसाम्राज्यसिंहासने अभिषिक्तः सम्राट् आसीत् नव्य-विद्या-विभूषितः प्राचार्यः । प्रा. सोनोपन्त दाण्डेकर इति तस्य पुण्यश्लोकस्य धन्यं नाम । लक्षलक्षसंख्याकानां भागवतानाम् अयं नेता । ज्ञानदेवी भवतु तुकारामस्य अभङ्गवाणी वा अस्तु, सा वाग्देवता एषां रसनाग्रनर्तकी । भक्तिकल्लोलप्रह्लादः प्राचार्यश्रेष्ठैः न केवलं महाविद्यालये तत्त्वज्ञानं पाठितम् । महाराष्ट्रधर्ममन्दिरं नन्दादीपवत् मन्दस्वच्छप्रकाशेन पवित्रीकृतम् । मन्दिरस्य मङ्गला प्रसन्नता वर्धिष्णुतां नीता । महामहोपाध्यायैः प्रा. दत्तो वामन पोतदारः युक्तम् एव कथितम्— "प्रा. दाण्डेकरैः-महाराष्ट्र-हृदयमन्दिरे परमेश्वरः संरक्षितः ।

इदं महाराष्ट्रभाग्यं सांप्रतिके गुरुपूर्णिमा-मङ्गलारम्भक्षणे सहसा विलुप्तम् । प्रा. दाण्डेकराः पार्थिवशरीरेण पञ्चत्वं गताः । परं तत् मङ्गलं, पवित्रं, प्रसन्नं तेजः लक्ष-लक्ष-भागवतानां हृदयमन्दिरे धर्मदीपत्वेन अजरम् अमरं प्रकाशरूपं तिष्ठति । तद् अस्माकं सर्वोत्कर्षाय अस्तु ।

नमः शान्ताय तेजसे ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्री-शंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता

सौर १६ आषाढ १८९०

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् ९ अङ्कौ १७-१८

वार्षिकमूल्यम् रू. ८ * अस्य अङ्कस्य रू. ०-८०

भगवान् बादरायणः

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ।।

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ।।

श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः ।
तमहमरागमतृष्णं कृष्णद्वैपायनं वन्दे ।।

व्यासगिरां निर्यासं सारं विश्वस्य भारतं वन्दे ।
भूषणतयैव संज्ञां यदङ्कितां भारती वहति ।।

नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र !
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ।।

पठ्यताम्—अस्मिन् अङ्के शिवराज्योदयम् १४५-१६०

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

षाहे जहाँ ।

भारते मोगलभूपालेषु, अकबर: कर्ता राज्यस्य, संहर्ता रिपूणाम् आदर्ता कवीनाम् इति अनन्यलभ्य-लोकप्रियतायाः अत्युच्छ्रितां कोटिम् अवाप । तेषु षाहे जहानपि नावमः । अद्यत्वे सुप्रसिद्धायाः महत्या प्रौढ्या व्यवह्रियमाणायाः उर्दूभाषायाः आद्यप्रवर्तकः षाहेजहानेव । तदानीमस्या "रेख्ताँ" इति नाम । अयं स्वधर्मे महतीं श्रद्धां वहन्नपि परधर्मोत्कर्ष-सहिष्णुरासीदिति "क्षोणीपाल ! षहाबुदीन ! भवतस्तुल्यो न कश्चित् भुवि" इत्यादि-पण्डितराज-प्रभृतिमहाकवीनां सूक्तिरत्नप्रभयैव प्रतीयते । "षहाबुद्दीन्" इति षाहेजहाँ-भूमिपालस्य नाम ।

अस्य पुत्राः चत्वारः । दारा षिकोह प्रथमः । औरङ्गजेबः चरमः । दाराषिकोह महाज्ञानी सात्विकशिरोमणिः सदा ब्रह्मविचारनिरतः आसीत् । अनेन चतुर्णामपि वेदानाम् उपनिषदां रहस्यग्रंथानां च पहेलवीति प्रसिद्धायां फारसी (भारतदेशस्य पार्श्वे स्थिते देशे व्यवहृता) भाषायां परिवर्तनं कारितम् । अयं संस्कृत-वैदिक-दार्शनिक-विद्वद्वराणाम् अरबीबरानीफारसीभाषासु अधीतिनां परिषदि शरन्नभस्युडुगणमध्यगतकलानिधिः इव रेजे । वैदिकवाङ्मयस्य अन्यदेशीयभाषायां परिवर्तनम् इदमेव प्रथमम् । औरङ्गजेबोऽपि शूरः विद्वान् काव्यमर्मज्ञः स्वधर्मश्रद्धः परं क्रूरः दयालेशरहितः । अस्य सभायां नियामत्खाने आली विद्वत्सार्वभौमः आसीत् । संस्कृतकविः अप्येकोऽस्य सभायामासीत् । अन्यैः प्रोत्साहितोऽयं धर्मयुद्धानि प्रारेभे । स्वधर्मार्थे प्राणानपि त्यक्षामि इति प्रत्यजानात् । दाराषिकोह ज्येष्ठभ्राता पितुः समोऽपि विरुद्धधर्मश्रद्धः इति व्यापादितः अनेन । अन्यौ ज्यायांसौ भ्रातरावपि प्रेषितौ कृतान्तान्तिकम् । ज्येष्ठभ्रातुः सखा सूफी सरमद् सुप्रसिद्धः योगी ब्रह्मनिष्ठः महाकविश्च । फारसी-भाषायां रुबाईवृत्ते पद्यरचना न सुलभा । कृत्स्नफारसीवाङ्मये रुबाईवृत्ते रचयितारः सायेब् खियाम् प्रभृतयः द्वित्रा एव । तेषु सरमदपि । अयमपि दारामित्रम् इति घातितः । स्वपिता षाहेजहान् अपि कारागारे निवेशितः । कारागारस्य सर्वा भित्तयो महता प्रयत्नेन क्षीरधवला नेत्रारुन्तुदात्युज्ज्वलश्वेता विनिर्मिताः । तासाम् एव अनवरतनिरीक्षणेन अल्पीयस्येव काले षाहेजहाँ महाराजः धृतराष्ट्रः संवृतः ।

अत्र "षाहे जहाँ धृतराष्टः" इति रूपकम् । उपमेये उपमानाभेदारोपः । उपमायाम् इव रूपकेऽपि साधारणधर्मवत्ताज्ञानस्य वृत्यन्तरे-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

णाप्यावश्यकत्वम् । तयोः दिल्लीश्वरत्वं साधारणः धर्मः । तथा प्रज्ञाचक्षुष्ट्वमपि । तत्र विषयिणि धृतराष्ट्रे प्रज्ञाचक्षुष्ट्वं जन्मसिद्धम् । विषये तु पुत्ररतप्रयोजकव्यापारफलभूतम् इति विवेकः । अस्त्यन्योऽपि साधारणधर्मः एतयोः । शौर्यप्रतापशालित्वादि समानाधिकरणदर्पाहङ्कारादिमत् पुत्रवत्वरूपम् ।

अपि च औरङ्गजेबः हिरण्यकशिपुः इत्यपि रूपकम् । औरङ्गशब्दः कशिपुवाची, जेब = शोभमानः, कशिपूत्तमे विराजमान इति यावत् । बहुव्रीह्याश्रयणेन हिरण्यकशिपुः अयमेवेति ।। इदं शब्दसाम्यम् उभयोर्विषयविषयिणोः "सकलकलं पुरमेतत् जातं संप्रति सुधांशुबिम्बमिव" इति ।। अस्त्यन्यः साधारणः धर्मः औरङ्गजेब-हिरण्यकशिप्वोः "अकारणद्वेष-दौर्जन्य-क्रौर्यादिः"। एकत्र पितृकृतः पुत्रविषयकः अन्यत्र पुत्रकृतः पितृविषयः ।।

षाहे जहान् कारागारे वसन् न केवलं चक्षुषा अन्धः समभवत् । अपि तु क्षुत्पिपासा-व्याकुलोऽपि । तस्मिन्नवसरे पितापुत्रयोः सुदीर्घः पत्रव्यवहारः आसीत् । "रुक्आत् आलम्गीर् इति" ग्रन्थे बहूनि पत्राणि सोत्तराणि संगृहीतानि ।

एकदा राजराजः पुत्रम् एवं पद्यात्मकं पत्रम् अलेखीत्—

आफरीँ बाद बर् हिन्दवाँ हरबाब् ।
मुरद रा मीदेहन्द् दायम् आब् ।।
तू अजब् मुसलमानी ।
जिन्द् रा ब आब् तरसानी ।।

अस्यार्थः—

हिन्दूजनस्तुतिमिहार्हति सर्वभावैः ।
यस्तर्पयत्यपि पितॄन् सलिलैः परेतान् ।।
त्वं कीदृशो मुसलमानसि नैव जाने ।
पित्रे ददासि न जलं तु मुमूर्षवेऽपि ।।

१८-६-३१०
गौळीपुरा, हैद्राबाद २

गुण्डेराव हरकरे
निवृत्तसत्रन्यायाध्यक्षः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

संस्कृतम् एव शरणम्

भारतराष्ट्रस्य परं निधानं संस्कृतभाषा। तद्गतम् अलौकिकं विद्याधनम्। अहो महद्भाग्यम् अस्माकम्। अत्र नास्ति कोऽपि प्रौढिर्वा आत्मस्तुतिर्वा।

गतपञ्चसहस्त्रसंवत्सरेषु भारतस्य संस्कृतेः एकात्मता समानता च संस्कृतभाषयैव निरन्तरं संरक्षिते संवर्धिते च।

मानवस्य बुद्धिवैभवम् अव्यक्तविचारक्षमतायामेव प्रकर्षेण दृश्यते। पश्यतां वेदान्तदर्शनानां सुसूक्ष्मविश्लेषणपद्धतिः। नायं केवलं वाग्व्यायामः। वेदान्तस्य विचारपद्धतिरेव सांप्रतं विज्ञानशास्त्रेऽपि अवलम्ब्यते। किन्तु विज्ञानशास्त्रस्य प्रगतेः पराकाष्ठा वस्तुनः भेदं पुनः पुनः कृत्वा तत्परमाणुतः चैतन्यशक्तेः निर्मितिः। अधुना प्रयोगशालायां वस्तुमात्राद् या चैतन्यशक्तिः संपाद्यते ततः निःसंशय परतरा शुभंकरा च आत्मचैतन्यशक्तिः पुरा भारतवर्षीयैः ऋषिमुनिभिः स्वतनुषु योगाभ्यासादिद्वारा सकष्टं कठिनतरां तपश्चर्यां कृत्वा संपादिता।

यदि प्रामाणिकतया विचारः क्रियते तर्हि भवेत् सुस्पष्टं यन्नास्तीह कोऽपि विषयः यस्याभ्याससाधनानि न वर्तन्ते संस्कृतभाषायां न वा यस्याभ्यासः न कृतोऽस्ति संस्कृतभाषायां न वा यस्याभ्यासः न कृतोऽस्ति संस्कृतभाषाविद्वद्भिः। कौस्तुकास्पदं हि तत्।

भारतवर्षीयाणां महान् शोधः नाम विश्वस्य चराचरवस्तुगतम् आत्मतत्त्वम्। तन्निष्ठा आत्मौपम्यबुद्धिश्च। एषः विचारनिष्कर्षः तथ्यतः भारतीयानां महान् विक्रमः बुद्धेः परमोत्कर्षश्च।

तपसा उपासनया च करगतं भवति अतीन्द्रियं ज्ञानम्। आधुनिकं प्रयोगनिष्ठं ज्ञानं केवलम् इन्द्रियजन्यमेव। तेन बुद्धेः शक्तिरपि अहकारभावनया मर्यादिता दुर्बला च भवति। ततः न लभ्यते चान्तिमं तत्त्वम्। स्वसुखाभिलाषा एव विवर्धते। अनिर्बन्धसुखप्राप्त्यै शक्तिरेव सदैव उपास्यते। तस्य परिणामः हिंसा अशान्तिश्च। ऐहिकसुखसंपादने मानवानां काः प्रौढिदर्शकाः कथाः। अन्ते तु रुद्रनिसर्गस्य भीषणे क्षणिक-दर्शने का भवति मानवानां गतिः। कीटकेभ्योऽपि क्षुद्रोऽस्ति मानवः। इति दृष्ट्वा मत्वा च मनः भृशं खिद्यते विषण्णं च भवति।

किं मानवैः स्वमर्यादाः स्वसीमा नावगम्यन्ते। अदूरदृष्टितः सर्वत्र अतिचारः वर्तते। अतिचारात् शतशः विनिपातः नचिराद् भविष्यति

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

इति चिन्तया ग्रस्यते विश्वम् । बाह्यसुखैकनिरताया अवश्यमिदं फलम् । नास्त्यस्मिन् काऽपि शंका ।

तर्हि कथं एतन्महत् संकटं निवार्यते । एष महान् प्रश्नः । तस्योपरि पुनः पुनर्विचारः कर्तव्यः ।

भारतीयानां दृष्टचा किंबहुना विश्वस्यापि हितस्य दृष्टचा संस्कृत-भाषायाः अभ्यासः तत्प्रणीतसंस्कृतेः स्वीकरणम आचरणं संवर्धनं च कल्याणाय भवेयुः । तेनैव प्राप्तं भीषणं संकटं विनश्येत् ।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । इत्यलम् ।

१० म. गान्धीमार्गः
विलेपार्ले मुम्बई ५७

ल. वि. देशपांडे

पुण्यपत्तनस्थ-सांस्कृतिक-प्रवृत्तीनाम्

आ ग्रयस्थानम्

उ द्या न प्रा सा दः ।

(दू र वा णी ५७४९१)

अत्रैव निवासस्थानं शृंगेरीजगद्गुरु-श्रीमत्-शंकराचार्यश्रीचरणानाम् ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

गीर्वाणवाणीविलाससभा

श्रीवरदेन्द्रस्वामी–वृन्दावनसन्निधानम् लक्ष्मीमार्गः पुण्यपत्तनम्
श्रीनृसिंहजयन्तीमहोत्सवस्य शुभसंदर्भे

शुभाभिनन्दनम्

बालस्य नेह शरणं पितरौ नृसिंह ।
आर्तस्य चागदमुदन्वति मज्जतो नौः ॥
तप्तस्य तर्पणविधिर्यदिहाञ्जसेष्टः ।
तद्वत् प्रभो तनुभृतां त्वदुपासकानाम् ॥

इति अनितरसाधारणभक्त्युत्कण्ठितवचसा विधृताञ्जलिना परमभागवतोत्तमेन श्रीप्रह्लादेन स्तुतः भगवान् श्रीनृसिंहः कामक्रोधादिरूपं दैत्यं निर्मूलं व्यापाद्य स्वदास्ययोगं संततम् अनुगृह्णातु भक्तेभ्यः इति संप्रार्थ्य अस्मिन् श्रीनृसिंहावतारस्य आनन्दमयावसरे सुखसमृद्धिं कामयामहे सर्वेषाम् । अपरोक्षीकृतश्रीशाः परमकरुणालवः शङ्कू-कर्ण-प्रह्लाद-व्यासराजावताररूपाः श्रीराघवेन्द्रतीर्थगुरुसार्वभौमाः निखिलविघ्ननिवारणदक्षैः स्वकीयैः कृपाकटाक्षैः अनुगृह्णन्तु अनवरतम् इति साञ्जलिबन्धं प्रार्थयामहे अस्मिन्नेवावसरे ।

ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने ।
हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥
अगम्यमहिमा लोके राघवेन्द्रो महायशाः ।
श्रीमध्वमतदुग्धाब्धिचन्द्रोऽवतु सदानघः ॥

इति पुनश्च संप्रार्थ्य नन्दति नन्दति नन्दत्येव स्वयम् अभिनन्दयति भवतः नन्दनन्दनैकानन्दिनी श्रीमदानन्दतीर्थतीर्थैकप्रसारमोदिनी श्रीमद्वरदेन्द्रस्वामिसन्निधिभूषिता सकलगुरुवरेण्यकारुण्यपोषिता गीर्वाणवाणीविलाससभा ॥

डॉ. पञ्चमुखी पार्थसारथिः   विद्यारत्नं पञ्चमुखी राघवेन्द्राचार्यः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीः ॥

अन्तरिक्षप्रवाससाधनसंशोधकः

डॉ. काशीनाथ घाणेकरः

महाराष्ट्र-राज्य-शिक्षणविभागस्य सेवानिवृतानाम् उपसंचालकानां श्रीमुरलीधरराय घाणेकर महोदयानां तनुजनुषः, खासदार श्री भाऊराय वैशम्पायनानां भागिनेयाः डॉ. काशीनाथ घाणेकर-महाभागाः परदेशे 'पीएच्. डी.' इत्युपाधिं संपाद्य सार्धमासपरिमितविरामकाले इदानीम् अत्र समागताः। जूनमासस्य षोडशे दिने रविवासरे यदा डॉ. घाणेकरमहोदयाः सान्ताक्रूझ-विमानस्थानके अवातरन् तदा तेषां बन्धुजनः सुहृद्गणश्च तान् द्रष्टुं तत्रोपस्थित आसीत्। जुलै मासे विरामावसाने ते कॅनडा-देशं प्रतिगमिष्यन्ति। अद्यत्वे ते कॅनडादेशस्थित-मॅकमास्टर-विद्यापीठे डॉक्टरोपाध्युपहिताधिकारिके संशोधनविषये 'फेलो' इति पदमधिष्ठाय संशोधनकार्यम् अनुतिष्ठन्ति। कॅनडादेशे निर्वर्त्यं संशोधनकार्यं ७०-७१ तमे ख्रिस्ताब्दे समापयिष्यते, ततश्च ते स्वदेशं प्रत्यागमिष्यन्ति।

डॉ. काशीनाथ घाणेकरमहोदयाः ख्रैस्ते १९३५ तमेऽब्दे जानेवारीमासे १९ तमे दिने औरङ्गाबादनगरे जननम् अलभन्त। प्राथमिकशिक्षणं तत्रैव सरस्वतीभुवन-विद्यालये संपाद्य हैद्राबादनगरे 'सिटीकॉलेज'-महाविद्यालयात् शालान्तपरीक्षां प्रथमश्रेण्यां विद्यापीठे सर्वप्रथमत्वेन च तैः समुत्तीर्णा। ५६ तमे खिरस्ताब्दे 'एम्. एस्सी.' इत्युपाधिं प्रथमश्रेण्याम् उत्तीर्य उस्मानिया-विद्यापीठतः संपाद्य तत्रैव चतुरः संवत्सरान् प्राध्यापयन्। तदानीम् एव तैः 'फुल्ब्राइट-प्रवासानुदानम्' प्राप्य अमेरिकायां 'परडू' विद्यापीठे 'अल्युमिनीयम् ॲण्टिमोनाइड्' इति विषयमभ्यस्य १९६६ तमे ख्रैस्ताब्दे 'पी.एच्. डी.' इत्युपाधिः समवाप्यत। एवं सुयशोऽधिगम्य 'परडू' विद्यापीठस्य 'इण्डियाना पोलिस कॅम्पस्'-विभागे पदार्थविज्ञानशास्त्रस्य सहायकाध्यापकाः समवर्तन्त। इदानीं ते कॅनडा-देशे मॅक्मास्टर-विद्यापीठे 'दि एरिया ऑफ् थिन् फिलम फिजिक्स्' इति विषयं संशोधयन्ति।

डॉ. घाणेकर महोदयाः १९६८ तमे खिरस्ताब्दे परदेशे एव पुण्यपत्तनविद्यापीठस्य गणितशास्त्रविषयकम् 'एम्. एस्सी.' इत्युपाधिं प्रथमश्रेण्यामधिगतवतीं महाराष्ट्रकवि-श्री यशवन्तमहाभागानां भ्रात्रीयां

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

सौभाग्यकांङ्क्षिणीं मीनाक्षीदेवीम् उपयम्य गृहस्थाश्रमिणः संवृत्ताः। सौ. मीनाक्षीदेव्याऽपि अमेरिकायां 'गणितम्, कॉम्प्यूटर्स ऑर्गनायझेशन्' इति विषययोः 'एम् एस्.' इत्युपाधी संपादितौ।

अन्तरालयुगेऽस्मिन् यानि साधनानि अवकाशयानप्रवासम् उपकुर्वन्ति, तदन्यतमानां कतिपयसाधनानां संशोधनं डॉ. घाणेकरमहोदयानां कृतिगोचरम् अस्ति। क्रान्तिकारकाः अत्युन्नतविज्ञानप्रगतिपोषकाश्च शोधाः 'सॉलिड् स्टेट फिजिक्स्' इत्यनया सरण्या निष्पन्नाः सन्ति। एतत्सरण्यधिगमरूपा प्रगतिर्भौतिकीशास्त्रे गतेषु पञ्चदशषोडशेषु वर्षेषु समजायत। ततः प्राक् 'न्यूक्लिअर फिजिक्स्' इति सरण्यासीत्। इदानीं तु 'द्वितीया सरणी विज्ञानस्य विनाशिका, प्रथमा तु संवर्धिका' इति वैज्ञानिकैरभ्युपगम्यते।

'शारदा' पुण्यपत्तनम् २ काशीनाथमित्रोत्तमः

स्मर्यताम् राष्ट्रदेवो भव त्वर्यताम्

राष्ट्ररक्षणार्थम् .... बलसंवर्धनम्
बलसंवर्धनार्थम्.......मिष्टान्नसेवनम्

सर्वोत्कृष्टमिष्टान्नार्थं सत्वरं द्रष्टव्याः

दूरवाणी] शर्मा स्वीट मार्ट [७२३२
दत्तमन्दिरसमीपे पुणे२.

स्मर्यताम्! स्मर्यताम्! स्मर्यताम्!

शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुण्यपत्तनम् २

४२५ सदाशिव पेठ, खजिनामहाल-भवनम् पुण्यपत्तनम् २

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

माधव ! शिवास्ते पन्थानः सन्तु !!

पुण्यपत्तनम् दि. १० जुलै १९६८

पुण्यपत्तन-विश्वविद्यालयस्य एम्. ए. परीक्षायाम् अस्मिन् संवत्सरे श्री. **माधव मुरलीधर देशपाण्डे** सर्वप्रथमत्वेन समुत्तीर्णः। डॉ. जोशी शिवरामशास्त्रिणां (पण्डितजी) मार्गदर्शनेन संस्कृते व्याकरणशास्त्रे कृतपरिश्रमः बालमुकुन्द-संस्कृत-महाविद्यालयस्य प्राचार्याणां पं. भागवत वामनशास्त्रिणां छात्रोत्तमः, वाक्पटुः माधवः शारदापाठकानां कृते विविधां रुचिरां साहितीं समये समये विरचितवान्। यथा संस्कृते तथा जर्मनभाषायाम् अपि प्रवीणः, मूलतः पं. न. ना. भिडेमहोदयानां शिष्यत्वेन शालान्तपरीक्षायां संस्कृते सर्वप्रथमत्वेन जगन्नाथ-शंकरशेठ-शिष्यवृत्ति-विजेता माधवः नचिरम् एव प्रस्थास्यति नौयानेन अमेरिकाराष्ट्रं पेनसिल्वानिया-विश्वविद्यालये प्रगतसंस्कृताभ्यासार्थम्।

भारतवर्षीयां मूल-गुरुपीठपरंपराम् अविस्मृत्य माधवः 'सततम् ऊर्ध्वम्' इति नयेन यशःशीलः विद्यावंशवृद्धश्च भवतु इति प्रार्थयामहे तस्य सर्वोत्कर्षम्।

माधव ! शिवास्ते सन्तु पन्थानः।

राष्ट्रदेवपूजनार्थं बलोपासनम्। बलोपासनार्थं सात्त्विकान्नसेवनम्।

तदर्थं त्वर्यताम्

का का ह ल वा ई

१ दत्तमन्दिरम्, शुक्रवार-पुणें २ दूरवाणी ५७८६८

२ डेक्कन-जिमखाना, पुणे ४. दूरवाणी ५७८६७

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

श्रीस्वामीसमर्थः प्रसन्नः । श्रीभगवान् परशुरामः प्रसन्नः ।।

।। श्रीगजाननमहाराजः प्रसन्नः ।।

श्रीगुरुभक्तानां कृते निवेदनम्

अक्कलकोढपुरमिदं श्रीस्वामिसमर्थानां प्रदीर्घवास्तव्येन पुनीतं क्षेत्रं विद्यते । श्री अवधूतदत्तात्रेयस्यास्य लीलाविलासः इत एव व्यक्तः अभूत् । श्रीस्वामिमहाराजस्य कार्य-कीर्तिकुसुमस्य परिमलः श्रीबाळप्पा-महाराजेन सर्वत्र प्रसारितः । तेन अपूर्वयाः परंपरायाः प्रारम्भोऽभवत् । गुरुरूपमातुः परंपरायाः पताका गङ्गाधरमहाराजेनाधिकं प्रोन्नता कृता । प्रज्ञापुरीयमहति पीठे परमसद्गुरुः श्रीगजाननमहाराजः ११-३-१९३८ क्रिस्ताब्दस्य दिनाङ्के, फाल्गुन शु।। १० शालि० शके १८६० शुभदिने विराजमानः दृश्यते। अतीतत्रिंशदब्दाभ्यन्तरे श्रीगुरोः भक्तवर्गः दिने दिने शुक्लेन्दुवत्–वर्धमानः खलु । अक्कलकोटक्षेत्राकर्षणमपि वृद्धिगतमेवेति ।

भगवती-सोनामातुरुदरतः शिवानन्दस्वामिनः पितुः श्रीगुरोर्जन्म ज्ये०शु।। ६ शके१८४० क्रिस्ताब्ददिनाङ्के १७ मे १९१८ शुभदिने खरगपुरे (वङ्गदेशे) अभवत् । "तात, ध्रुव इव त्वं भविष्यसि," इति मातुराशी-र्वचनं भविष्ये यथार्थं जातम् । पीठेऽधिष्ठानघटनया तस्य प्रतीतिर्व्यक्ता किल । बालमिमं गजाननमहाराजेति जगत्–व्याहरिष्यति यथासमयम् इति वाक्सुधा साकोरीस्थोपासनीमहाराजस्य मुखारविन्दतो निर्गता । येषां श्रीगुरुसन्निधौ गन्तुं भाग्यं, तेषाम् एवेयं प्रतीतिः स्यात् ।

सद्गुरुगजाननमहाराजस्य वयसः पञ्चाशत् वर्षाणि पूर्णानि ज्येष्ठ-शु।। ६, क्रि० दि० २-६-६८ दिने । एकपञ्चाशत्तमे वर्षे पदार्पणं कृतं महाराजेन। श्रुत्वैतद् गुरुभक्तानां प्रमोदो वर्धेत ।

प्रज्ञापुरस्थपीठस्य प्रत्ययः सद्भाववतां नित्यमेव प्रत्येति । गुरु-चरणसान्निध्यतया समाधानं केचन भक्ता अनुभवन्ति । जीवने " व्यवहारस्य समस्यापूर्तिः "— इति हेतोः कृपाप्रत्ययम् अनुभवन्ति । अध्यात्मप्रगतिम् इच्छवोऽपि महाराजप्रयुक्तं मार्गदर्शनं कुर्वन्ति च । साध-कानां मानसपरिवर्तनं दृष्ट्वा इतरे जनाः प्रभाविता भवेयुरेव ।

अल्पायासेन श्रीदर्शनस्य लाभः, दर्शनेनेच्छापूर्तिः तेन च कृतार्थत्वम् । अनन्यभावेन प्रार्थिताःश्रीचरणाः वरदहस्तेन सान्त्वनं कुर्वन्ति । सकामोऽ-हम् प्रज्ञापुरं चागच्छम् विना पृच्छां प्रश्नोत्तरं लब्धवान् इति भाविकानां विविधा प्रतीतिः । " गरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः । "

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

अवधूतपरंपरया प्रभावितं प्रज्ञापुरमिदानीं चिरजीविनो भगवतः परशुरामावतारस्य कथं प्रधानकार्यक्षेत्रम् ? कथं च तत्र परशुरामलीला-गुणगानम् ? इति साशङ्कप्रज्ञावतां कुशलतया निरसनं क्रियते ।

महाशिवरात्रिदिने पातालेश्वरस्य दर्शनार्थं गच्छन्नहं श्रीदर्शनं कृतवान् तन्निमित्तं श्रीगुरोः कार्यस्य स्वरूपं व्यक्तमभवत् । तस्य स्पष्टी-करणं श्रीचरणविरचितसप्तश्लोक्यां वर्तते ।

यज्ञदानतपःकर्मस्वाध्यायनिरतो भवेत् ।
एष एव हि श्रुत्युक्तः सत्यधर्मः सनातनः ॥ १ ॥

यज्ञादि-स्वाध्यायान्त-पञ्चशीलावलम्बनेनैव सत्यसनातनधर्मस्य रक्षणं भविष्यति। विज्ञानप्रगतौ, यन्त्रयुगेऽपि यज्ञसंस्थाया महिमा कीदृक्-प्रभावः ? न केवलं व्यक्तेः किन्तु समष्टेरपि समस्यापूर्त्यै मानवप्रयत्नातीत-शक्तेरावाहनं च कथं भवितुमर्हति ? इति तर्कशुद्धविरचनया प्रतिपादितम्। परिवर्तनशीले, कराले, त्रस्तजीवने कलौ प्रतिकूलदशायामपि साधकः अवलम्बितुं शक्नुयात्–इति सुकरं पञ्चशीलसाधनं निर्णीतं भाति ।

विचार्यैव ज्ञास्यते खलु, पंचशीलान्तर्गततपःकर्मस्वाध्यायार्थं साधकः स्वयं प्रयतेत ।यज्ञदाने तु व्यक्तिकृते समुदायकृते वा स्याताम् । श्रीगुरुचरणा-नुगृहीतो भक्तः श्रीचरणान् सेवितुं वाञ्छति। व्यक्तिः स्थितिं बुद्धिं च अनुसृत्य सेवां करोत्येव । समुदायेन कर्तुं शक्यायां सेवायामहमहमिकया वर्तमानाः विकसितां श्रीकार्यस्य व्याप्तिं दृष्ट्वा मोदमानाश्च वयम्-अभि-नन्दामः । सद्गुरुणा एकपञ्चाशत्तमे वर्षे पदार्पणं कृतमिति निमित्तेन व्यापकां समुदायसेवां कर्तुं योजयेम। नैकानां भक्तानां मनसि विविधाः योजनाः एतन्निमित्तं भवितुम् अर्हन्ति। साकल्येन विचार्यैव कार्यक्रमं नियुङ्क्ष्यामः ।

सोमयागवत् अर्थात् कश्चित् महायागो एतन्निमित्तं कर्तव्य इति मानसो हेतुः । तेन वातावरणशुद्धिस्तदनुषंङ्गेण च जगत्कल्याणकृत् कार्यमपि भवेत् ।

असत्प्रवृत्तेर्विलयः सत्प्रवृत्तेश्चोदयः, दुर्भिक्षक्षोभयोः नाशः, सुखस-मृद्धि-शान्तिश्च सर्वत्रात्यावश्यकम् अद्य। सत्पुरुषसन्निधौ शास्त्रोक्तपद्धत्या योगयुक्तेन मनसा यागादि कृतं चेद् वातावरणशुद्ध्यर्थमावाहनं विजानीया-त्समुचितशक्तेः । महायज्ञार्थं तत्समवेतेतरानुष्ठानार्थं च पञ्चषण्मासतः प्राक्कालत एव व्यवस्था कर्तव्या भवेत्, वित्तव्ययः ‘ महतो महीयान् ’ कर्तव्यः । इदं समुदायकार्यं निश्चितम् तत्र । सर्वेषाम् अवसरः प्रदेयः । कार्यस्यास्य महत्त्वं प्रबोध्य यावच्छक्यं सेवाभिसन्धिः सूचना च महती सेवैव ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

इदमपि श्रीकृपया शक्यम्-कश्चित् धनिकः अधिकं द्रव्यं दातुं प्रभवेत् चेत् तेन तद् स्वभारभूतं न केनचित् मन्तव्यम्। यावच्छक्यं सेवितुं स्वयं प्रयतेत सः। स्वयंस्फूर्तिः यथा, यथा वा भावना शक्तिश्च समुदाय-सेवायाम्।

श्रद्धया यज्ञनारायणस्य नमस्कारादारभ्य सुमनसा आर्थिकं सह-कार्यं कर्तुं सः शक्नुयात् शरीरेण धनेनापि वा स्वशक्त्यनुसारतः सेवायां सहभागं लभतामिति ज्ञाप्यते।

महायज्ञसमारम्भे सद्गुरुगजाननमहाराजस्य सामुदायिकं महापूजनं कर्तव्यम् इति योजना। तस्मिन् सुप्रसंगे श्रीचरणयोः सेवारूपेण यद्अर्पणीयं स्यात्, तद् समष्टिरूपेण सर्वेषाम् पुञ्जीभूतद्रव्येण भवतु इति।

सद्गुरुचरणारविन्देषु दृढभावेन भवितव्यम्, चित्तशुद्धिश्च भवेत्। श्रद्धाविकासेन—ऐहिकं पारलौकिकं जीवनं च सुखमयं भूयात्—इत्येव केषांचिद् मनःकामना भवेत्। समुदायसेवायां सहकारी कोऽपि भाविकः घटकत्वेनाधिकारी भविष्यति। श्रीचरणानां वरदो हस्तः अस्मासु सर्वेषु वर्तते। तेषां नितान्तकृपया यदस्माभिर्लब्धम्, लप्स्यमानं च तद् अपूर्वम् अभङ्गं च निःसंशयं स्यात्। कृतार्थत्वेन प्रतिक्रिया सेवारूपेण कथं कर्तव्या इति महती चिन्ता मानसं व्याकुलीकरोति। सेवकैः प्रयुक्ता भवतु नाम-सेवा येन केन प्रकारेण, परंतु "गङ्गाजलं गङ्गायै समर्पणमिव भविष्यति"।

श्रीचरणैर्लब्धानुमतिसामुदायिकीसेवाभिसन्धिः प्रथमत एव प्राप्ता इत्येतद् लेखनेन स्पष्टीकरणं नावश्यकम्। उपरितननिर्देशानुसारेण प्रज्ञापुराकृष्टागणितभक्तेषु परिचितान् संबोध्य योजनायाः कार्यमिदं स्वहस्ते गृह्णीयुः महाभागाः सेवकाः। अतो हेतोः भवत्सु निवेदनम् इति।

एतद्-कार्यं शास्त्रपद्धतिमनुसृत्य निर्दोषं भवितुमर्हति। ग्रामे ग्रामे, स्थाने स्थाने, पत्तने पत्तने, विभागे विभागे वा अन्तःसमिति संस्थाप्य कार्य-मिदं प्रचालनीयं भवेत्। निमित्तेनानेन गुरुभक्तानामनुक्रमणिका कर्तव्या, यथावकाशं परिचयमस्य कार्यस्य निवेदयेम, इतिवृत्तं प्रेषयिष्यामः। ततः कार्यविधायकानि परिचयपत्राणि भवन्तः भक्तवृन्देषु प्रेषयितुं समर्था भवेयुरिति शम्।

भवदीयः

चं. त्रि. प्रधान

कार्यवाहः सद्गुरुसेवासमितिः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

वैद्युत-गणक-यन्त्र-साहाय्येन संस्कृतव्याकरणम्

मुम्बापुरी १० जुलै १९६८ (विशेष-प्रतिनिधितः)

'पाणिनीयं व्याकरणं गहनं जटिलं क्लिष्टम् इति कृत्वा दुर्बोधम्। परं गणिततत्त्वानाम् आधारेण स्थितं व्याकरणम् इदं वैद्युत-गणक-यन्त्राणाम् आधारेण सुबोधं कर्तुं प्रयतन्ते अमेरिका-राष्ट्रस्थ-प्रमुख-विद्यापीठेषु विद्यमानाः संस्कृत-प्राध्यापकाः। नचिरमेव वैद्युत-गणक-यन्त्राणि प्रभवेयुः संस्कृत-व्याकरण-स्पष्टी-करणे।" इति निवेदितं मिनेसोटो (अमेरिका) विद्यापीठस्य संस्कृत-विभाग-प्रमुखैः प्रा. उषर्बुध आर्य महोदयैः।

"संस्कृत-भाषाभ्यासे बद्धादराणां संख्या संप्रति वर्धिष्णुतां गच्छति। भारतीय-धर्म-तत्त्वज्ञान-जीवनपद्धतिविषये जिज्ञासूनां पाश्चि-मात्यानां सर्वाधिकप्रियः संस्कृतलेखकः भगवान् श्रीकृष्णः।" इति निवेद्य तैः प्रोक्तम्— "विविधभाषासु अनूदिता गीता प्रतिवर्षं सहस्रशः विक्री-यते। अमेरिकाराष्ट्रे २५ विद्यापीठेषु भारतविषयकाः विशेषाभ्यास-विभागाः विद्यन्ते। अमेरिकाराष्ट्रे संस्कृतविषयकं सर्वश्रेष्ठं केन्द्रं पेन-सिल्वानियाविद्यापीठम्। हॉर्वर्ड-शिकागो-प्रभृतीनि विद्यापीठानि अपि तत्र महत्त्वपूर्णं कार्यं कुर्वन्ति।

डॉ. उषर्बुधार्याः गतषोडशवर्षाणि आर्यसमाजस्य-धर्मोपदेशकत्वेन अमेरिकाराष्ट्रे बहुमूल्यं कार्यम् अनुतिष्ठन्ति। रिच्युअल सॉङ्ग्ज् ॲण्ड फॉक साङ्ग्ज् ऑफ द हिन्दूज्' इति तेषां प्रबन्धः ग्रन्थरूपेण नचिरमेव प्रकाशितः।

भारतयात्रां कृत्वा मासद्वयेन ते पुनरपि अमेरिकां गमिष्यन्ति।

नागपुरम् दि. १० जुलै ६८ (विशेष-प्रतिनिधितः)

प्राचीनभारतेतिहाससंशोधकैः महामहोपाध्यायैः डॉ. वा. वि. मिराशीमहोदयैः नागपुर-विश्वविद्यालयाय ५००० (पञ्चसहस्र) रूप्यकाः समर्पिताः। प्रतिवर्षं बी.ए. उपाधिपरीक्षायां संस्कृते प्राचीनभारतेतिहासे वा सर्वप्रथमाय छात्ररत्नाय २५० (सार्धशतद्वयं) रूप्यकात्मकं पारितो-षिकं दातुं विनियोजयिष्यते द्रव्यम् इदम्।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

* *

सर्वप्रकारकः कासः 'खोकला' नाम-विश्रुतः ।
सत्वरं तस्य नाशार्थं गुणवत् कासनाशकम् ॥

का स ना श क

आयुर्वेदीयौषधीनां शास्त्रशुद्धा विनिर्मितिः ।
निःशङ्कं निश्चिता यत्र र स शा ला हि सा ध्रुवम् ॥

दी आयुर्वेद रसशाला
पुण्यपत्तनम् ४

शाखा

पुणें-सांगली-कोल्हापुर-बेळगांव-हुबळी-मुम्बई-अमरावती
नागपुर-इन्दौर-जोधपुर-दिल्ली

o o o o o o o o o o o o o o o o o o o o o o o

श्री. वी. श्रीधरन् १२० वि. ओ. सी. मार्गः कराईकुड्डी (दक्षिणभारतम्)
इत्येतैः जिताः १७,५०० रूप्यकाः

रूप्यकाः ५०,०००
लिट्क्विझ् क्र. ३५ द्वारा जेतव्याः ।

प्रवेशपत्रिकाः रविवासरीयेषु प्रमुखेषु वृत्तपत्रेषु प्रकाश्यन्ते । प्रमुखनगरेषु प्रतिनिधयः सन्ति । स्वीक्रियन्तां तेभ्यः प्राप्तिपत्राणि प्रवेशपत्रिकाः च ।

पत्रेण प्रार्थितं चेत् लिट्क्विझ्-साप्ताहिकं विना मूल्यं प्रेषयामः ।

लिट्क्विझ् प्रायव्हेट लिमिटेड

अलङ्कारः, बालाराममार्गः, मुम्बापुरी ७

१५ भाषासु १०० प्रतिनिधयः १५० वृत्तपत्रेषु विज्ञापनम् ।

* *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ भाषासु मधुरा दिव्या पवित्रा सुरभारती ॥

शर्करा

गृहोपयोगाय ... निर्यातकरणाय

भारतराष्ट्रे
शर्करानिर्मातृषु
प्रति-एकरक्षेत्रम्
इक्षु-निर्माणे
शर्करानिर्माणे
च
अग्रतःसराणाम्
अ स्मा क म्
राष्ट्रोत्कर्षे
राष्ट्रविभवे
च
श्रे यो भा गि ता
अ भि माना स्प द म् ।

गोदावरी-शर्करा-कर्मान्तः मर्यादितः

(दि गोदावरी शुगर मिल्स लि.)

* * *

कार्यदर्शि-प्रतितिधिः—

के. जे. सोमय्या अँण्ड सन्स प्रायव्हेट लिमिटेड
फाजलभॉय बिल्डिङ्ग फोर्ट
महात्मा गान्धी-मार्गः, मुम्बई १

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीशङ्करः शं करोतु ॥

बबाई २५-६-६२

अव्याजप्रणयप्रवणेषु श्री वसन्त अ. गाडगीळ महोदयेषु सहस्रशः प्रणतिरस्तु । श्रीमताम् अवर्णनीयम् औदार्यम् अभिनन्दनीयं सौजन्यं च वीक्ष्य कस्य सहृदयस्य हृदयं प्रमोदमेदुरं न स्यात् ? नियतं 'शारदा'-प्रेषणं संप्रति ग्रन्थरत्नपञ्चकं च प्रेष्य स्वीयं दानकर्णत्वं प्रकटीकृतं भवतेति भृशं नतशिरसोऽभिवन्दामस्तमां भवन्तम् ।

महतोऽपि महीयाँसो गुणतो गरीयाँसो भावतो भव्याँसः श्रेष्ठतो वरीयाँसः सौजन्यगुणगरिष्ठाः कविवराः श्री १००५ ग. बा. पळसुले नामधेयाः श्रीमद्भिः सहर्षं सूचनीयाः मदर्थं तन्निमित्तग्रन्थरत्न-प्राप्ति-जन्याऽऽनन्देन मदीयेनेति भूयो भूयो निवेदनम् ।

अग्रेऽपि सर्वदा दया विधेया, स्वहस्त-कुशेशयेनानुग्राह्योऽयं जनः सुरसरस्वतीलेखनकौशलेन पत्रविशेषेणेति निवेद्य हृदयं स्वयंभावं च, विरमामि मुधा विस्तरात् ।

तिवाडी-बबाई (राजस्थानम्)

भावत्कगुणमुग्धोऽविदग्धः
नन्दलालशर्माशास्त्री

* संस्कृताभ्यासार्थम् अवश्यं संग्राह्या *

पं. वामन वेङ्कटेश आपटे--विरचिता

पाठ्य व्याकरण दीपिका

पृष्ठसंख्या १५०   मूल्यम् रु. १-२५

प्राप्तिस्थानम् 'शारदा-' कार्यालयः ४२५ सदाशिव, पुणे २

सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ८=००

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीशिवराज्योदये महाकाव्ये ३५ तमः सर्गः ॥

कूटप्रयोगः

अथ स्वपुत्रं रिपुसैन्यपाशनिबद्धमाकर्ण्य चराननेन ।
समाश्रिता राजगडं चिराय जिजातिचिन्ताज्वलिता बभूव ॥१॥
अहर्निशं सा कुलदेवतायाः प्रपन्नलोकार्तिविभञ्जनायाः ।
निरन्तरध्याननिमग्नचित्ता जिजाऽभवन्मूर्तिमतीव भक्तिः ॥२॥
दृढं निरुद्धापि च देहलीशप्रचण्डसेनाक्रमणः समन्तात् ।
सा पुत्रनिर्मोचनचिन्तनार्ता स्वयं रिपावाक्रमितुं चकाङ्क्ष ॥३॥
सङ्ग्रामशूरेषु शिवस्य मित्रेष्वभ्याशमागच्छतु कश्चिदेकः ।
यस्तत्र पर्णालगिरेः समन्ताद् आक्रम्य भिन्द्यादरिसैन्यपाशम् ॥४॥
विचिन्तयन्तीति जिजा कदाचित् पुरःस्थितं प्रैक्षत वीरवर्यम् ।
नेताजिमत्युज्ज्वलशौर्यराशिं सिद्दी-हिलालानुसृतं विनम्रम् ॥५॥
तं विक्रमार्कं विपदन्धकारे दृष्ट्वा चिरेणाभ्युदितं ह्यकस्माद् ।
अस्तं गतास्तत्क्षण एव नूनं तदन्तरस्था निखिला विकल्पाः ॥६॥
अयं पराक्रम्य महातरस्वी विच्छिद्य शत्रून् सहसैव शीघ्रम् ।
असंशयं मोचयिता सुतं मे दिनैस्त्रिभिर्वाऽथ चतुर्भिरेव ॥७॥
संकल्पयन्तीति तमानमन्तं वीरं मनाक् क्रोधमिवोद्गिरन्ती ।
जिजाऽऽह नेताजिमुदग्रवीर्यं निर्भर्त्सयन्ती कटुतीव्रशब्दैः ॥८॥
न वेत्सि किं ते प्रणयी सखा वा राजाऽथवा मान्यवरः प्रणेता ।
शिवोऽवरुद्धो रिपुभिश्चिराय प्राणैः समं मे परनालदुर्गे ॥९॥
विलम्बमानस्य तवालसत्वं कर्तव्यवैमुख्यजमक्षमार्हम् ।
तनूजबन्धाकुलचेतनायाः ममान्तरङ्गं क्रथति प्रकामम् ॥१०॥
सुहृद्विपत्तिं स्वविपत्तिमेव प्रायः कुलीना गणयन्ति लोके ।
तवाऽन्यथा चेष्टितमीक्षमाणा त्वामन्यथैवाऽस्मि वितर्कयामि ॥११॥
त्वं सत्कुलीनो यदि तत्त्वतोऽसि गच्छाग्रतस्तत्र निमेषमात्रात् ।
नो चेद् गमिष्याम्यबलैकलाऽपि स्वपुत्रनिर्मोचनसंगराय ॥१२॥
स्वयं प्रविष्याधिरणं जवेन निर्मस्तकीकृत्य च जौहरं तम् ।
चिराददृष्टं रिपुपाशबद्धं विमोचयाम्यात्मजमात्मभूतम् ॥१३॥
इत्यातुरं तद्वचनं जिजाया निर्भर्त्सनादुःश्रवमात्तरौक्ष्यम् ।
शृण्वन्नकस्माद् व्यथितः स मेने विषाक्तभल्लाहतिमात्मनीव ॥१४॥
विद्धोऽपि हृन्मर्मणि तद्वचोभिः अक्षुब्धचेता स निसर्गधीरः ।
वृत्तं यथाभूतममुं निवेद्य ह्यारोपमात्मन्यपमार्ष्टुमैच्छत् ॥१५॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मातः क्षमस्वाल्पमिदं वचो मे महापराधस्य हि किंकरस्य ।
नापेक्षसे यत् खलु लेशमात्रं घोरेऽधुना पुत्रविपत्तिकाले ॥१६॥
मया न कर्तव्यपराङ्मुखेन नैवालसेनात्र कृतो विलम्बः।
जातः स मे दुष्करयुद्धसाध्ये 'कार्येऽवलग्नस्य कथञ्चिदेव ॥१७॥
शिवप्रभोः शासनतः समस्तं तस्याफझुल्लस्य बलं निपात्य ।
संप्रस्थितोऽहं रिपुराजधानीं कर्तुं महाभीतिविपत्तिरुग्णाम् ॥१८॥
ततश्च दिल्लीपतिवाहिनीं ताम् अत्रासमन्तात् प्रसृतामगाधाम् ।
विच्छिन्नकूलां प्रचलन्महोर्मि नदीमिवोल्लङ्घ्य समागतोऽस्मि ॥१९॥
यथागतं गच्छति दास एष तव क्षणेऽस्मिन्नविलम्बमेव ।
भुजंगभोगाभमरातिपाशं विच्छिद्य कर्तैव शिवं विमुक्तम् ॥२०॥
इत्यूचिवान् स प्रबलः प्रणम्य पदाब्जयोः श्रीशिवराजमातुः ।
विनिर्ययावाशिषमेतदीयां विलम्बहेतुं खलु मन्यमानः ॥२१॥
अथाचिराद् दौहृदसैन्यपाशविमुक्तमभ्यागतमात्मजं सा ।
उत्प्रेक्षमाणा जननी शिवस्य संग्रामवार्ताहरमैक्षताग्रे ॥२२॥
स राजमातुः पदयोर्निपत्य कथञ्चिदुद्भिन्नवचःप्रवृत्तिः ।
महात्रपानम्रशिरा उवाच विषण्णवक्त्रानुमितां प्रवृत्तिम् ॥२३॥
मातः स नेताजिरितोऽभिद्रुत्य पर्णालदुर्गं परितोऽरिसेनाम् ।
विदारयन्नप्ययशः प्रपेदे दुरन्तदुर्भाग्यनिरुद्धवीर्यः ॥२४॥
शिवैकनिष्ठस्य विधर्मिणोऽपि पुत्रो हिलालस्य युवा बलाढ्यः ।
प्रयुध्यमानो समराग्रभागे वीरोचितां सद्गतिमभ्युपेतः ॥२५॥
विच्छिन्नधैर्येव च तद्वधेन चमूर्हिलालस्य बत क्षणेन ।
प्रताड्यमाना रिपुशस्त्रपातैः बभूव वात्याहतधूलिकल्पा ॥२६॥
प्रतीक्षमाणो रिपुसैन्यभेदं स्वामी बहिर्यातुमनाः स बन्धात् ।
दुर्गाग्रतोऽपश्यदतीव दूरात् पलायितोत्थापितधूलिरेखाम् ॥२७॥
अकल्पिताभ्यागतमात्मसेनापराभवोदन्तममुं निशम्य ।
सा मेरुकल्पं निजधैर्यमुच्चैः मेने विषादाम्बुधिगाढमग्नम् ॥२८॥
अथात्मनिर्मोचनयुक्तिचिन्तानिमग्नधीर्धीरवरः शिवाजिः ।
वर्षर्तुमर्धक्षपितं विलोक्य सम्भाविनीमापदमैक्षतान्तः ॥२९॥
अभिन्नजीवान् सुहृदोऽल्पसंख्यान् अनल्पधीभक्तिविवेकवीर्यान् ।
मन्त्रोचिते सद्मनि रात्रिकाले स युक्तितः संगमयांचकार ॥३०॥
तेष्वागतोऽसौ प्रभुवंशकेतुः बाजिर्विपत्सागरवज्रसेतुः ।
गङ्गाधराख्यः कुटिलो द्विजन्मा तथाऽपरस्त्र्यम्बकभास्कराह्वः ॥३१॥
वितानवह्निप्रतिमेषु तेषु त्रिषु प्रदीप्ताननकान्तिमत्सु ।
स्वातन्त्र्यसङ्ग्रामसुदीक्षितोऽसौ शिवः स्वयं मन्त्रहविर्जुहाव ॥३२॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

तदैव रात्रौ शिवमभ्युपेतो वनेचरः कोऽपि चरोऽतिगूढम् ।
मन्दस्मितोद्भिन्नतमिस्रजालो यः स्वामिकर्णे निजगाद किञ्चित् ।।३३।।
श्रुण्वन् वचस्तस्य वनेचरस्य चिराय चिन्तास्तमितस्मितोऽपि ।
शिवः स्मितोत्फुल्लविशालनेत्रः स्वभूषणैस्तं समलंचकार ।।३४।।
अथापरेद्यूः रिपुसैनिकास्ते चिराय चैकत्र निवासखिन्नाः ।
दुर्गस्य कोणे क्वचिदेकमीषद् उद्घाटितं द्वारमलोकयन्त ।।३५।।
ततो बहिर्गच्छददृष्टपूर्वं निरीक्ष्य दूराच्च मनुष्ययुग्मम् ।
आश्चर्यभीहर्षसमाकुलास्ते ह्यन्योन्यमैक्षन्त विचित्रमुद्राः ।।३६।।
कृत्वाततज्यानि धनूंषि शीघ्रं मौर्वीसमारोपित-तीव्र-बाणाः ।
सुदूरवेधक्षमधन्विनस्ते प्रैक्षन्त तत् संकुचितैकनेत्राः ।।३७।।
ततश्च चिह्नं शरणागतानां तत्रोद्धृतं दृष्टिपथं प्रपेदे ।
यद् वीक्ष्य सर्वेऽपि विमुक्तचापं सहर्षगर्जं ननृतुः प्रमत्ताः ।।३८।।
क्षणादुदन्तः कुतुकावहोऽसौ तैलस्य बिन्दुर्वहदम्बुनीव ।
पर्णालदुर्गं परितोऽरिसैन्ये विचित्ररूपः प्रससर्प सद्यः ।।३९।।
स जौहरो यावदिमां प्रवृत्तिं श्रुणोति सानन्दमतीव हृद्याम् ।
तावत् पुरोऽपश्यदुपस्थितं तत् मनुष्ययुग्मं विनतोत्तमाङ्गम् ।।४०।।
ततोऽब्रवीदेकतरोऽतिमन्दं गङ्गाधरोऽहं नरवीर ! विप्रः ।
नतेन मूर्ध्नार्पयते तवेदं पत्रं प्रणामेन समं शिवस्य ।।४१।।
सोल्लासमादाय तदर्पितं तत् सुहृद्वरान् श्रावयितुं हि पत्रम् ।
वर्णानभिज्ञोऽपि तु विज्ञमानी स्वयं पपाठ स्खलिताक्षरं सः ।।४२।।

इदं जौहरवीराय नमोवाकं प्रयाचते ।
शाहसूनुः शिवो नम्रः संस्मरन् जगदीश्वरम् ।।४३।।
पर्णालदुर्गं प्रत्येति वीरवर्यो भवादृशः ।
अवगत्येति जातोहं सहसा दर्शनोत्सुकः ।।४४।।
राज्यलोभाभिभूतेन मयोच्छृङ्खलचेतसा ।
अपराधाः कृता पूर्वं तेऽरुन्धन्निव मां तदा ।।४५।।
भयेन चाल्पभाग्येन परिग्रस्तं मनो मम ।
भवत्कृपामहालाभाद् बत मामत्यवञ्चयत् ।।४६।।
पश्चात्तापावदग्धोऽहं श्रीमतः शुभदर्शनम् ।
नक्तमद्यैव वाञ्छामि स्वकल्याणाय केवलम् ।।४७।।
मत्कल्याणाय यत् किञ्चित् भवान् समुपदेक्ष्यति ।
हृत्कोशे रत्नवन्नित्यं धारयिष्यामि वीर तत् ।।४८।।
भूत्वा विजापुरेशस्य करुणालेशभाजनम् ।
को न विन्देत कल्याणं जगदीशस्य चाऽथ वा ।।४९।।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मज्जन्तु मेऽपराधास्ते भवतो हृदयाम्बुधौ ।
वर्षन्तु करुणासान्द्राः कटाक्षा मयि भूभुजः ॥५०॥
श्रीमन् ! विजापुरेशस्य सुदुर्लभमनुग्रहम् ।
मयि कारयितुं शक्तो ह्येक एव भवान् भुवि ॥५१॥
तदनुग्रहपात्रत्वं प्राप्तुमुत्को ह्ययं जनः ।
स्वायत्तं भवदायत्तं मिथोऽद्यैव चिकीर्षति ॥५२॥

पत्रं पठित्वाऽधिगतं प्रमोदं विधातुकामो द्विगुणं तदीयम् ।
गङ्गाधरोऽसौ विनतोऽग्रजन्मा तादृक् पुनर्वाचिकमप्युवाच ॥५३॥
अहो महाभाग ! महीश्वरस्य कृत्वाऽप्रियं कः सुखमत्र शेते ।
कुपथ्यसेवीव नितान्तमन्तः पश्चात् तपत्येव नृपापकारी ॥५४॥
भुञ्जीत हालाहलमप्यसह्यं गाहेत वा व्याघ्रवनं प्रकामम् ।
न तु प्रमादादपि सौख्यकामी सम्राडपथ्यं विदधीत लोके ॥५५॥
अनाद्यनन्ते धरणीतलेऽस्मिन् काले च को नाम कदा क्व चाऽसौ ।
जातः प्रजायेत जनो महात्मन् नृपापकारी च सुखाधिकारी ॥५६॥
अस्मादृशैर्विप्रजनैर्नितान्तं सम्राड्विरोधादुपरन्तुमेव ।
प्रबोधितोऽप्युद्धतमित्रमन्त्राद् अपथ्यमद्धा कृतवान् रिपुस्ते ॥५७॥
तस्य प्रबोधस्य हि साम्प्रतत्वं सम्प्रत्यसौ हन्त विदांकरोति ।
विप्रोपदेशानवहेलयन्तस्तपन्ति पश्चाद् बलिनोऽपि नूनम् ॥५८॥
तद् वीरशार्दूल शिवस्य पत्रं सम्मान्यतां पर्वतमूषकस्य ।
खल्वत्र किञ्चित् खलु संशयित्वा स्थितोऽस्मि सत्यप्रतिभूर्द्विजोऽहम् ॥५९॥

निर्विण्णश्चिरमेकदेशवसतेस्त्रस्तो महावर्षणात्
हस्तप्राप्तमिवावगत्य सकलं प्राप्यं विना संगरम् ।
सेनानीः स जिगीषुरात्मसचिवैः सम्मन्त्र्य कालोचितं
स्वीचक्रे शिवराजपत्रलिखितामभ्यर्थनां जौहरः ॥६०॥
सैन्ये तत्र पुनश्च सम्परिसृता सेनापतेर्मण्डपात्
सा वार्ता शरणागतः शिव इति प्रत्येकमानन्दयत् ।
मन्वानाः कृतकृत्यतां प्रमुदिताः सर्वत्र पर्यभ्रमन्
स्वस्वस्थानमपास्य सैनिकगणाः प्रातर् विहंगा इव ॥६१॥

इति श्री. भा. वर्णंकर-विरचिते
श्रीशिवराज्योदये महाकाव्ये कूटप्रयोगो नाम ३५ तमः सर्गः समाप्तः ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीशिवराज्योदये महाकाव्ये ३६ तमः सर्गः ॥

महासाहसम्

अथारिसैन्यविक्षोभं निजनीतिप्रयोजकम् ।
यथापेक्षं चरप्रोक्तं शृण्वन्नानन्दितः शिवः ॥१॥
स्वसखं च तदा प्राह सौहार्दैकनिदर्शनम् ।
प्रभुवंशमहारत्नं बाजिमाजिधुरन्धरम् ॥२॥
चरेण नक्तं ह्यः प्रोक्तं रन्ध्रस्थानमरातिषु ।
नीरन्ध्रमभितो दुर्गं स्रोतःप्रायं स्थितेष्वपि ॥३॥
मम कूटप्रयोगेण चेदानीं रिपुसैनिकाः ।
व्यामूढा इव चेष्टन्ते छिन्नसेनानुशासनाः ॥४॥
बहु नृत्यन्ति गायन्ति पिबन्तो मदिरां मुहुः ।
भक्षयन्ति यथाकामं सर्वेऽप्यानन्दतुन्दिलाः ॥५॥
न स्मरन्ति स्वकर्तव्यं गणनेतृनियोजितम् ।
स्मरन्ति गृहदाराणां सर्वे निर्गमनोत्सुकाः ॥६॥
अद्याषाढस्य मासस्य पौर्णिमासी शुभा तिथिः ।
पूर्णोऽपि लुप्तस्यादिन्दुर्नभस्यम्बुदमेदुरे ॥७॥
ज्यौत्स्नी चापि तमिस्रेव भवेदद्य निशीथिनी ।
तदद्यैव प्रयास्यामि दुर्गान्तरमितो ध्रुवम् ॥८॥
विशालदुर्गोऽस्माद् दुर्गाद् यः क्रोशे दशमे स्थितः ।
स मामाह्वयते नूनं सहवासाय मित्रवत् ॥९॥
नक्तमद्यैव गच्छेयं तत्रोल्लङ्घ्यारिवाहिनीम् ।
वसुदेवो महापूरां धैर्येण यमुनामिव ॥१०॥
यत् स्वधर्मपरित्राणसम्भवं पुण्यमुज्ज्वलम् ।
मम मूर्ध्नि स्थितं किञ्चित् तस्य दिव्यार्भकं यथा ॥११॥
तन्मामस्मान्महापूराद् रिपुसेनामयात् क्षणात् ।
हृदिस्थ ईश्वरो ब्रूते ध्रुवं संतारयेदिति ॥१२॥
स्वस्वामिनोऽतिपूज्यस्य तद् विज्ञाय मनीषितम् ।
महामनीषी श्रद्धावान् बाजिस्तं सहसाऽवदत् ॥१३॥
देव त्वया यन्निर्णीतं युक्तायुक्तविवेकिना ।
कस्तत्र मादृशो दोषं पश्येदत्यल्पबुद्धिभाक् ॥१४॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पूर्वमुलङ्घितोऽम्भोधिर्बलिना वायुसूनुना ।
न चित्रं तत्र पश्यामि सोऽगाद् यद् वायुवर्त्मना ॥१५॥
घोरा जलचरास्तत्र ये व्यालमकरादयः ।
न तेषां दृक्पथं प्राप्तो मारुतिर्यत् स खेचरः ॥१६॥
पर्णालपरिखीभूते रौद्रेऽस्मिन्नरिसागरे ।
रक्षिणः पर्यवेक्षन्ते चरतः कीटकानपि ॥१७॥
एतस्मिन् संकटे घोरे साहसं यच्चिचकीर्षसि ।
तादृशं न कदा कोऽपि कृतवान् नो करिष्यति ॥१८॥
धीरवर्यस्य वीरस्य महासाहसगाहिनः ।
कस्तवाहं सहायाय किंकरश्चरणाश्रितः ॥१९॥
निःशस्त्रो निःसहायोऽपि धीमात्रसचिवो भवान् ।
अक्षौहिण्यापि शत्रूणामजय्यः खलु मे मतः ॥२०॥
साहसे परमेतस्मिन्नपूर्वे चाप्यनुत्तरे ।
पदानुसरणं कर्तुं देव ! दासोऽयमिच्छति ॥२१॥
भवच्चरणनिक्षेपोत्थितपङ्ककणैः प्रभो ।
तीर्थस्नानमहापुण्यं दासोऽयं सञ्चिचीषति ॥२२॥
आपच्चेदापतेत् काचिद् रिपुपक्षादकल्पिता ।
त्वदन्नपरिपुष्टोऽयं देहस्तत्रार्गलीभवेत् ॥२३॥
त्वमेव परामात्मा मे त्वद्वाणी मे परा श्रुतिः ।
त्वदर्थे जीवनं प्रेयः श्रेयश्च मरणं मतम् ॥२४॥
अनुमन्ये तपस्तीव्रं कृतं प्राक्तनजन्मसु ।
यदस्मिञ्जन्मनि प्राप्तं त्वच्छायाप्रायिकं वपुः ॥२५॥
तदिदानीं प्रभो याचे त्वन्निर्गमनवर्त्मनि ।
तमःप्राये क्षणं क्षीणज्योतिर्भावं प्रपद्यताम् ॥२६॥
शिवस्तां वाचमाकर्ण्य स्वामिभक्तिरसोत्कटाम् ।
वाच्यावाच्यविमूढोऽभूत् सुप्रत्युत्पन्नधीरपि ॥२७॥
अहो निर्मलशीलस्य पुण्यचारित्र्यशालिनः ।
स्वस्मिन्ननुत्तमां भक्तिं ज्ञात्वा देवोऽपि मुह्यति ॥२८॥
अहो साहसकर्तारः सन्ति केचन कुत्रचित् ।
दुर्लभाः किन्तु लोकेऽस्मिंस्तेषां स्वेच्छानुयात्रिकाः ॥२९॥
अनापद्यपि साहाय्यं विरलो हि चिकीर्षति ।
किं पुनर्दुर्मदाराति-प्रचुरायां महापदि ॥३०॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

तस्य भक्तिसमां शक्तिं तादृशीं च महाधृतिम् ।
विजानन् स शिवो धीमाननुजज्ञौ तदीहितम् ॥३१॥
निजाकाङ्क्षितसम्पूर्तिप्रसन्नास्यं तमब्रवीत् ।
नवीनसाहसारम्भसुप्रसन्नाननः शिवः ॥३२॥
नूनं भाग्यवती माता पिता च मम भाग्यवान् ।
यत्पुत्रेण सुहृत् प्राप्तस्त्वादृशः कोऽपि धैर्यवान् ॥३३॥
नूनं मित्र महाभाग्यो मादृशो नात्र भूतले ।
आपत्स्वग्रेसरा यस्य त्वादृशाः वीर्यशालिनः ॥३४॥
यामब्रवीः सखे वाचं सौहार्दहृदयंगमाम् ।
तयाऽहमधमर्णत्वं नीतोऽस्म्यामरणं ध्रुवम् ॥३५॥
मदन्तः सात्त्विका भावास्त्वद्वाचाऽङ्कुरिता हि ये ।
प्रत्युत्तरप्रयत्नेन ते वैकल्यमवाप्नुयुः ॥३६॥
सद्भावोदीरितां वाचं प्रतिवक्तुमुदीरिता ।
वाणी सद्भावगर्भाऽपि भवत्येवौपचारिकी ॥३७॥
तदलं मम भाषित्वा समयोऽयमपेक्षते ।
कण्टकाकीर्णमार्गेण बहिर्निर्गमनक्रियाम् ॥३८॥
सहस्रषट्कमस्माकं वीराणामत्र वर्तते ।
मामन्वेतु त्वया साकं तेषां षड्गुणितं शतम् ॥३९॥
साहाय्येनावशिष्टानां संरक्षन् दुर्गमुत्तमम् ।
विगृह्णीतारिभिर्धीरं धीरस्त्र्यम्बकभास्करः ॥४०॥
कृष्णवेशाः खड्गवन्तो यान्तु सर्वेऽनुयात्रिकाः ।
नृवाह्यं तेषु नेतव्यं केवलं वाहनद्वयम् ॥४१॥
वहन्ति पथिकाः प्रायः पाथेयं देहधारणम् ।
सुदुष्करे प्रवासेऽस्मिन् पाथेयं प्रभुचिन्तनम् ॥४२॥
श्वासार्थमपि पर्याप्तोऽवसरो दुर्लभोऽधुना ।
भोक्तुमन्नं जलं पातुं स लभेत कुतः पुनः ॥४३॥
निःश्वासमपि निःशब्दं कुर्वन्तोऽखण्डगामिनः ।
अश्वानीकप्रवेगेन यास्यन्त्यद्य पदातयः ॥४४॥
प्रायेण क्षुण्णमध्वानमध्वगा मार्गयन्ति ते ।
अद्य बुद्ध्यैव पन्थानमक्षुण्णं मार्गयामहे ॥४५॥
वर्जयन्ति प्रवासार्थं प्रायः सर्वे निशीथिनीम् ।
तामेव तिमिरग्रस्तां बहु मन्यामहे वयम् ॥४६॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

यमाश्रयितुमिच्छामो निकटस्थमितो गताः ।
असौ विशालदुर्गोऽपि ग्रस्तः स्वातन्त्र्यशत्रुभिः ॥४७॥
सूर्यरावाभिधः कश्चित् सुर्वेवंशोद्भवोऽधमः ।
जसवंतसहायो यो दुर्गं तमधितिष्ठति ॥४८॥
यद्यपीतः प्रयास्यामः परिहर्तुमिहाहवम् ।
किन्तु तेन विना तत्र प्रवेशोऽपि सुदुष्करः ॥४९॥
तत् केवलं प्रवासार्थं नाद्य निर्गमनं हि नः ।
प्रवत्स्यामो ध्रुवं वीर ! संग्रामायैव तत्त्वतः ॥५०॥
तस्यामेव निशि प्रचण्डजलदक्लिष्टेऽपि तारापथे ।
प्रक्रान्तं विधुना निगूढगमनं वेगादिवैकाकिना ॥५१॥
तद् विज्ञाय च साहसातिरसिको दुर्लङ्घ्यगूढाध्वना ।
निष्चक्राम शिवोऽपि बाजिसहितः शीघ्रं यथा निश्चितम् ॥५२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये महासाहसो नाम ३६ सर्गः समाप्तः ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीशिवराज्योदये महाकाव्ये ३७ तमः सर्गः ॥

शत्रुवञ्चना

अथार्धरात्रे घनवर्षसान्द्रे प्रतिध्वनत्स्फूर्जथुभीतभूते ।
मुहुःस्फुरद्वैद्युतभासि केचित् चेरुश्चरा जौहरवाहिनीयाः ॥१॥
पर्णालपर्यन्तभुविप्रभूतशिलोच्चयायां घनशैवलायाम् ।
पदे पदे भूरि परिस्खलन्तो यान्ति स्म ते विश्रमितुं निवेशम् ॥२॥
तेष्वाह कश्चिच्चर आतमनैव पर्जन्यसंक्लिन्नसमस्तचैलः ।
अद्यान्तिमं पर्यटनं निशीथे श्वो यच्छिवाजिः शरणोन्मुखो नः ॥३॥
अन्योऽवदत् कश्चन रुग्णपादो गर्ताद्बहिर्निष्क्रमितुं सयत्नः ।
नातः परं कृच्छ्रमिदं सहिष्ये वशं प्रपद्येत रिपुर्यतः श्वः ॥४॥
इति ब्रुवाणा भ्रमणातिखिन्ना ध्वनत्सु मेघेष्वपि ते कथञ्चित् ।
तमिस्रगूढे घनगुल्मजालेऽशङ्कन्त धावन्नरयूथमारात् ॥५॥
निशम्य वाताहतवृक्षपर्णतालायमानं पदघातशब्दम् ।
रूक्षस्वरं तिष्ठत तिष्ठतेति श्रान्ताश्चरास्ते सकृदुज्जगर्जुः ॥६॥
साश्चर्यमालोक्यत तैः क्षणेन निजाग्रतो धीरतयोह्यमानम् ।
कराङ्गुलीगण्यजनानुयातं नृवाह्यमेकं चतुरस्रयानम् ॥७॥
नितान्तपर्जन्यतमिस्रघोरे कालेऽधुनारुद्धजनप्रचारे ।
को वाऽथ कार्ऽस्मिश्चतुरस्रयाने समुह्यतेऽनेन हि दुष्पथेन ॥८॥
अस्मिन् प्रदेशे न गताऽगता वा पिपीलिका चाऽपि न वीक्षिता या ।
आरक्षिभिः संततजागरूकैश्चारैस्तथास्माभिरतीवदक्षैः ॥९॥
इत्येवमाकर्ण्य चरस्य वाचं मूकायमाने सकले नृयूथे ।
उवाच कोऽप्यस्फुटमेकवाक्यं निःसम्भ्रमं सम्भ्रमकारणं च ॥१०॥
आषाढमासस्य हि पूर्णिमायां कुर्वन्ति भक्ता गुरुपादपूजाम् ।
तदद्य यात्येष तदर्थमेव राजाऽस्मदीयो गुरुपादनिष्ठः ॥११॥
संपद्यते सद्गुरुपादपूजा तावन्न सेवेत जलं कुतोऽन्नम् ।
राजाऽस्मदीयो ह्यत एव यामो वेगादमार्गेण विना विरामम् ॥१२॥
श्रुत्वाऽपि राजेति पदं द्विरुक्तम् अविश्वसन्तः श्रवणेन्द्रिये स्वे ।
भ्रमाभिभूताः सकलाश्चरास्ते मुहूर्तमात्रं स्थगिता बभूवुः ॥१३॥
नितान्तमाश्चर्यहतेषु तेषु चरेषु कश्चित् सहसा बभाण ।
प्रब्रूत सत्यं कतमः किमाह्वो भूयस्सु राजस्वयमत्र राजा ॥१४॥
अस्यां महाराष्ट्रभुवि प्रभूताः श्वसन्ति राजेत्ययथार्थसंज्ञाः ।
एकः परं जीवति तेषु राजा शिवाजिरित्युज्ज्वलनामधेयः ॥१५॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

स एव यातीत्यवदन्नकस्मात् सर्वेऽपि ते वाहनवाहकास्तान् ।
श्रुत्वैव तद्वाक्यममी समस्ताश्चराः स्वखड्गान् सहसोदकर्षन् ॥१६॥
ऊचुश्च तारस्वरमादिशन्तो ह्यवैधसञ्चारकृतो जनांस्तान् ।
अलं पदक्षेपमितो विधाय पश्चात् पुरो दक्षिणवामतो वा ॥१७॥
विजापुराधीश्वरवाहिनीया आरक्षिणः स्मोऽत्र चिरं चरन्तः ।
अवैधसञ्चारमहापराधान् जनान्निरोध्दुं हि धृताधिकाराः ॥१८॥
यद्येष राजा स शिवाजिरेव निरुद्ध आसीत् खलु योऽत्र दुर्गे ।
सेनापतिं प्रत्यविलम्बमेव तं नेतुमेते वयमुद्यताः स्मः ॥१९॥
तदत्र युष्माभिरिहैव सर्वैः यथास्थितं स्थेयमचेष्टमानैः।
वृत्तान्तमेनं द्रुतमेव तावत् सेनापतेः कर्णपथं नयामः ॥२०॥
कालेऽधुना कर्तुमकर्तुमत्र सैन्ये समर्थो हि स एक एव ।
यन्निस्सरेद् वाक्यममुष्य वक्त्रात् तदेव युष्मद्भवितव्यमद्य ॥२१॥
उक्त्वेति वाचं सहसा चरास्ते संकेतशब्दं परितो जगर्जुः ।
निशम्य तं चैकपदे समन्तात् प्रपेदिरे शस्त्रधराः प्रवीराः ॥२२॥
संरोध्य तैस्तान् नरयानवाहान् शिवाजिना चापि पलायमानान् ।
स्पशा अमी पङ्किलगर्तगूढपथेन सेनापतिमभ्यगच्छन् ॥२३॥
प्रबोधितोऽसावतिगाढनिद्रा-सुखावमग्नः प्रतिहाररक्षैः ।
प्रमृज्य नेत्रे पुरतो ददर्श स्पशानमून् पङ्कविलीढचैलान् ॥२४॥
तत्सन्निधौ सत्वरमेत्य सर्वेऽप्येकस्वरं हर्षविकस्वराक्षाः ।
भू-शीर्षसंस्पर्शमतिप्रणम्य बन्दीकृतस्ते रिपुरित्यवोचन् ॥२५॥
प्रगाढनिद्रातिवशंगतोऽसावाकस्मिकं दृश्यमदो वचश्च ।
पश्यंश्च शृण्वन् क्षणमात्रमन्तर्मेने सुखस्वप्नमहं विलोके ॥२६॥
ततश्च नेत्रे परिमृज्य भूयः श्रोत्रे च निष्पीड्य भुजौ विधूय ।
जृम्भाभिरास्यं च विवृत्य सोऽथ जागर्तिमात्मन्यतिनिश्चिकाय ॥२७॥
पप्रच्छ चामूनतिहृष्टवक्त्रान् आश्चर्यवद् वीरवरः स भूयः ।
कः को रिपुर्मे क्व कदा कथं रे बन्दीकृतो ब्रूत सविस्तरं तत् ॥२८॥
ते प्रोचुरुच्चैः प्रकटाट्टहासाः सेनापते भूमितलेऽखिलेऽस्मिन् ।
एको हि शत्रुस्तव योऽत्र दुर्गे संकुण्ठितोऽद्यावधि सैन्यपाशे ॥२९॥
गच्छन्निशीथे चतुरस्रयानम् अध्यास्य गूढं नरवृन्दनीतम् ।
अस्माभिरव्याहतजागरूकैः वने निरुद्धः स शिवाजिरद्य ॥३०॥
श्रुत्वैव तद् वाक्यमपारहर्षप्रोत्तुङ्गकल्लोलविलोलचेताः ।
स तीव्रकादम्बरभूरिपानप्रमत्तवत् ताण्डवितं चकार ॥३१॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

उद्घोषयन्नुच्चतरस्वरेण नामानि चात्मप्रियबान्धवानाम् ।
स आह्वयामास तदैव सर्वान् बन्धून् निजानन्दमिवोपभोक्तुम् ॥३२॥
आकर्ण्य सन्देशममुष्य सर्वेऽप्याश्चर्यमग्ना इव बान्धवास्ते ।
अन्ये तथैवाधिकृताः प्रवीराः सेनापतेः सन्निकटेऽन्वधावन् ॥३३॥
प्रत्येकमाह स्म पुनः पुनश्च स जौहरो गर्वित एकवाक्यम् ।
जानीहि जानीहि मयाऽद्य बद्धः शिवाजिनामा गिरिमूषकोऽसौ ॥३४॥
त्वरध्वमस्मिन् क्षण एव सर्वेऽप्यानेतुमेनं द्रुतमस्मदग्रे ।
वनेऽवरुद्धः कपटे पटीयान् स निस्सरेदाखुवदाशु गर्ते ॥
फतेहखानो न तथाफझुल्लः न फाजलो वा न च कश्चिदन्यः ।
शशाक यं बन्धुमरिं कथञ्चित् स मेऽधुना हस्तगतः शिवाजिः ॥३६॥
जामातरस्मिन् क्षण एव याहि मसूद ! नूनं रिपुसूदनोऽसि ।
साम्राज्यशत्रुं प्रपलायमानं निर्बध्य मामानय रज्जुपाशैः ॥३७॥
आदेशमन्वेव हि जौहरस्य जामातृभूतः स मसूदनामा ।
आनेतुमग्रे श्वशुरस्य शत्रुम् अल्पेन सैन्येन समं प्रतस्थे ॥३८॥
तमोनिगूढे पथि भूरिपङ्के सशैवलग्रावणि गाढगर्ते ।
पदे पदे ते बहुधा स्खलन्तोऽप्यगुः पुरस्ताद् यवनाः सवेगम् ॥३९॥
विद्युद्विभाद्योतितमन्धकारे नृवृन्दमालोक्य च नातिदूरे ।
जगर्जुरुच्चैरखिलाः सहर्षं प्राप्ता वयं तिष्ठत तिष्ठतेति ॥४०॥
पलायमानं पथि सन्निरुद्धं शिवाजिमारक्षिभिरात्मनीनैः ।
समीपमभ्येत्य निरीक्ष्य भूयो मसूद आनन्दमनन्तमाप ॥४१॥
कादम्बिनीच्छादितपूर्णचन्द्रे तस्मिन्निशीथेऽल्पतरप्रकाशे ।
उष्णीषिणं श्मश्रुलमासनस्थं विलोक्य निश्चिक्युरमुं शिवाजिम् ॥४२॥
प्रतीक्षमाणं श्वशुरं प्रतीमं शिवाजिमाक्रष्टुमना मसूदः ।
तेनाऽध्वना कर्दमदुर्गमेण यथागमं मङ्क्षु पुनः प्रतस्थे ॥४३॥
यथा यथाऽसौ शिबिरे स्थितानां दृक्पातसीमानिकटे प्रपेदे ।
तथा तथा जौहरवाहिनीनां जयध्वनिर्व्योम्नि भृशं जजृम्भे ॥४४॥
प्राप्तः स्वहस्ते विजयोऽद्य साक्षात् शिवाजिरूपेण चिरेप्सितोऽसौ ।
मत्वेति सेनापतिना सहैव सर्वेऽपि योधाः ननृतुः सहर्षम् ॥४५॥
दृष्ट्वा पदक्षेपममुष्य पुंसः ह्यधीरवीरोचितमात्तशङ्कः ।
स जौहरस्तुच्छतया तमुच्चैः पप्रच्छ किं खल्वसि रे शिवाजिः ॥४६॥
उवाच मन्दं स युवाप्यभीतः शिवाजिरेवाऽस्मि निजेन नाम्ना ।
बद्धो वृथारक्षिजनैस्तु मूढैः वृत्त्या यतोऽहं खलु नापितोऽस्मि ॥४७॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

प्रकोष्ठमालोक्य विलोम तस्य जात्याऽथ वृत्याऽपि च नापितस्य ।
स्वबञ्जने निर्गतसंशयास्ते संप्राप्तलज्जा यवना बभूवुः ॥४८॥
शिवाजिनामा स च नापितस्तैः प्रवञ्चनोद्दीप्तमहाप्रकोपैः ।
अनेकशः काष्ठकशाप्रहारैः प्रताडितो वेत्तुमशेषवृत्तम् ॥४९॥
स पीडितोऽप्याहतिभिर्नितान्तं बिभेद नेषन्निजमौनमुद्राम् ।
आपत्सु भर्तुः खलु सेवकानां रहस्यसंगोपनमेव धर्मः ॥५०॥
तयात्मनो वञ्चनया तदानीं प्रतर्क्य शत्रोः कपटप्रयोगम् ।
स जौहरस्तत्क्षण एव सर्वान् प्रस्थातुमाज्ञापयदात्मनीनान् ॥५१॥
मार्गे मार्गयितुं शिवं निशि तदा दुर्गान्तरं प्रस्थितं
संक्रुद्धो निजवञ्चनेन समरे हन्तुं च तं वञ्चकम् ।
तत्कालं महतीं तुरङ्गमचमूमादाय पत्त्यन्वितां
जामाता स हि जौहरस्य बलिनः सेनापतेर्निर्ययौ ॥५२॥

॥ इति श्रीशिवराज्योदये महाकाव्ये शत्रुवञ्चना नाम
३७ सर्गः समाप्तः ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीशिवराज्योदये महाकाव्ये ३८ तमः सर्गः ॥

वाजिविक्रमः

अथाध्वानमतिक्रम्य दीर्घं घोरं सुदुर्गमम् ।
कृतार्थतां शिवो मेने समुद्रमिव मारुतिः ॥१॥
प्राच्यामरुणिमानं च फुल्लाम्बुजसहोदरम् ।
आलोक्योद्गच्छदरुणप्रभवं विजहर्ष सः ॥२॥
निरीक्ष्य परितः सह्यं परीतं वनराजिभिः ।
अधित्यकाभिरात्मानं गोपयन्तं तुतोष सः ॥३॥
ततः कलकलो भ्राम्यत्-खगानां वनवासिनाम् ।
भीतिजन्य इवाकस्मात् परितः शुश्रुवे वनम् ॥४॥
ससम्भ्रमं प्रधावन्ति वृन्दानीतस्ततस्तथा ।
कपीनां च मृगाणां च व्यलोक्यन्त समन्ततः ॥५॥
आक्रन्दमार्तं विद्धानां चित्रकाणां विजृम्भितम् ।
दूरादपि स शुश्राव तत्प्रतिध्वनिमेदुरम् ॥६॥
स तर्ककुशलो धीमान् सहसैवान्वमन्यत ।
लिङ्गैराकस्मिकैरेतैर्भयस्थानमुपागतम् ॥७॥
निजानुयात्रिकान् कांश्चित् स हि तत्कालमादिशत् ।
वृक्षाग्रेषु समारुह्य परितो दृश्यतामिति ॥८॥
अखण्डजागरक्लेशकषायितविलोचनैः ।
तैर्नातिनिकटे दृष्टमश्वानीकं प्रवेगवत् ॥९॥
अश्वानीकमिति ज्ञात्वा वाजिराजिविशारदः ।
शिवराजं प्रणम्याह स्वामिनिष्ठोचितं वचः ॥१०॥
स्वामिन् गवेषयन्तोऽस्मान् रुद्धदुर्गविनिर्गतान् ।
प्रधावन्तीत एवेमे संक्रुद्धा रिपुसैनिकाः ॥११॥
अस्मन्निर्गमनं तेषां विदितं चेत् सुनिश्चितम् ।
क्षुधार्तेवापतेदत्र समग्रारि-वरूथिनी ॥१२॥
निमेषलेशलक्षांशोऽप्यधुनाऽत्र प्रतीक्षितुम् ।
जानात्येव महाराजः समयो नावशिष्यते ॥१३॥
न प्रार्थनार्थं समयः कुतस्तत्पुनरुक्तये ।
तद् यद् ब्रवीति दासोऽयं तत् सर्वं प्रतिमान्यताम् ॥१४॥
प्रास्ताविकमपीदं मे नूनमक्षणभाषणम् ।
अज्ञस्य हि विशेषज्ञः स्वामी तत् क्षन्तुमर्हति ॥१५॥
त्वत्सान्निध्यातिलुब्धोऽपि प्रार्थये नतमस्तकः ।
इतो दूरं प्रयाहीति क्षणेऽस्मिन्नेव कुत्रचित् ॥१६॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

यमाश्रयितुकामस्त्वमाप्रयाणक्षणादसि ।
असौ विशालदुर्गस्ते नातिदूरे व्यवस्थितः ॥१७॥
तमाक्रम्य प्रवेगेन ध्वंसयित्वा विरोधकान् ।
शतघ्नीध्वनिभिर्वार्तां मामावेदय चात्मनः ॥१८॥
तावद् विचूर्णयाम्येतानरातीनाततायिनः ।
उच्चैरापततो वेगात् पयोदानिव पर्वतः ॥१९॥
स्वामिनिष्ठैकशीलस्य वचस्तस्य निशम्य तत् ।
प्रसन्नोऽपि विषण्णोऽभूत् सुहृत्स्नेहमयः शिवः ॥२०॥
आपत्सु धर्मो भृत्यानां स्वामिसंरक्षणं यथा ।
तथैव भृत्यसंत्राणं स्वामिनोऽपि हि तत्त्वतः ॥२१॥
मदर्थमयमात्मानं संग्रामे होतुमिच्छति ।
कथमानृण्यमेतस्य प्राप्नुयामिह जन्मनि ॥२२॥
निष्कृतिः शक्यते कर्तुं त्यागानां विविधात्मनाम् ।
हौतात्म्यरूपत्यागस्य न सम्भवति सा क्वचित् ॥२३॥
अभिधेयं विधेयं वाऽवसरेऽस्मिन् कथं नु किम् ।
इत्यशक्तः स निर्णेतुं प्रेम्णा सुहृदमैक्षत ॥२४॥
मनसा भक्तिसान्द्रेण निध्यायञ्जगदीश्वरम् ।
व्याकुलः प्रार्थयामास मित्रकल्याणधीः शिवः ॥२५॥
"मृत्युञ्जय ! महाकाल ! घोरेऽस्मिन् राष्ट्रसंकटे ।
दैत्यसंहारसामर्थ्यं तवाधेहि सुहृत्सु मे ॥२६॥
निष्कामराष्ट्रसेवोत्थं यत् पुण्यं मयि किञ्चन ।
संक्रामयस्व तत् सर्वं सुहृत्स्वेतेषु मेऽधुना ।
शस्त्रेष्वापात्यमानेषु रिपुभिर्मत्सुहृद्गणे ।
साधुत्राणचणाऽसौ ते करुणा कवचायताम् ॥२८॥
अल्पसंख्या इमे वीरा असंख्येयाश्च ते द्विषः ।
सहस्रगुणमेतेषां प्रत्येकं वर्धतां बलम् ॥२९॥
स्वातन्त्र्यसमरस्यास्य मयि धूर्निहिता त्वया ।
तन्निर्वाहाय देहोऽयं रक्षणीयः कथञ्चन ॥३०॥
त्वदीयायैव कार्याय जिजीविषुरहं प्रभो !
कृच्छ्रादितः प्रयास्यामि न कलेवरलोभतः ॥३१॥
श्रद्दधे सर्वभूतानां हृद्देशे तिष्ठसीति हि ।
विदांकरोषि तन्नूनं भावना मम हृद्गताः ॥३२॥
क्षम्यतामपराधो मे करुणाघन सर्वथा ।
रणान्निर्गच्छतः कृच्छ्रे विहायैतान् सुहृज्जनान् ॥३४॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

इत्यशब्दं हृदि ध्यात्वा बाष्पाविलविलोचनः ।
सुहृदं बाजिमालिङ्ग्य क्षणाद् वेगेन निर्ययौ ॥३४॥
षट्शतानां प्रवीराणां शिवमन्वगमंस्तदा ।
बाजिवागनुसारं हि त्रिशतं शिवसैनिकाः ॥३५॥
शेषैश्च नरशार्दूलैः शत्रुध्वंसविशारदैः ।
दुर्गमं गह्वराध्वानं रोद्धुं बाजिः प्रचक्रमे ॥३६॥
बृहत्तमाश्च ग्रावाणः शतशोऽथ सहस्रशः ।
सञ्चिताः सहसा सर्वैर्भेत्तुं मुण्डानि विद्विषाम् ॥३७॥
शाखाः करिकराकारा पादपानामनेकशः ।
विच्छिन्ना मुसलीकर्तुं द्विषन्निष्पेषणोचिताः ॥३८॥
यद् यदालक्षितं किञ्चिद् वन्यं संहारसाधनम् ।
तत् तत् सपदि तैर्वीरैः संहसा सञ्चितं तदा ॥३९॥
बाजिराह तदा सर्वान्निजादेशवशंवदान् ।
उच्चैरुद्दीपयंस्तेषां वीर्यं वायुरिवानलम् ॥४०॥
बान्धवाः जीवितेऽस्माकं पुण्यकालोऽयमागतः ।
यत् स्वातन्त्र्यमहादेवं त्रातुं युद्धयामहेऽधुना ॥४१॥
विच्छिन्ने दक्षिणे पाणौ पुनः सव्येन युध्यताम् ।
उभयोरपि विच्छेदे शिरोघातं च युध्यताम् ॥४२॥
रुग्णेऽथ दक्षिणे पादे सव्ये स्थित्वैव युध्यताम् ।
रुग्णयोः पदयोर्जान्वो समुत्थाय प्रयुध्यताम् ॥४३॥
युद्धमेतन्न योद्धव्यं बाहुभ्यामेव केवलम् ।
प्रत्येकमङ्गुली चापि यततामरिमर्दने ॥४४॥
पिपासा चेत्प्रबाधेत रिपोः पिबत शोणितम् ।
बुभुक्षायां प्रदीप्तायां मांसं खादत शात्रवम् ॥४५॥
किं ब्रवीम्यधुना प्राप्ताः शत्रवस्ते पुरस्सराः ।
प्राणेष्वपि प्रयातेषु युद्धयन्तां कुणपानि नः ॥४६॥
सहस्रं द्विषतामत्र प्रत्येकं घातयेम चेत् ।
त्रिशतं चापि भूयास्म लक्षत्रयमिता वयम् ॥४७॥
गणयित्वा शिरांस्येव गण्यास्ते पामराः नराः ।
वीराः परन्तु सङ्ग्रामे खण्डितैः रिपुमुण्डकैः ॥४८॥
तदल्पसंख्यतामूलं कातर्यं माऽस्तु नोऽधुना ।
शिवकार्यधुरीणानामशिवं तत् कथं स्पृशेत् ॥४९॥
विवेकविधुरो मृत्युर्ग्रसेतापि वपूंषि नः ।
ग्रसितुं न समर्थोऽसौ यशांसि तु हुतात्मनाम् ॥५०॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

अस्माकं विद्धकायानां रुधिरैरभिषिञ्चितः ।
तीर्थीभवेदयं नूनं निगूढः कन्दरापथः ॥५१॥
आत्मानं विजुहूषूणामाहवे राष्ट्रहेतवे ।
अपि सिद्धदशारूढाः कलां नार्हन्ति षोडशीम् ॥५२॥
वर्षतीत्थं तदा तस्मिन् ज्वलद्वीररसायनम् ।
आक्रान्तं म्लेच्छमातङ्गकदम्बैस्तत्र गह्वरे ॥५३॥
स्वामिभक्तिमहाज्योतिर्भूतामल्पीयसीं चमूम् ।
अमूं निर्वापयन्तीव ववृधे रिपुवाहिनी ॥५४॥
पुरः प्रक्षिप्यमाणं हि प्रत्येकं चरणं रिपोः ।
निमिषे निमिषे च्छिन्नमदृश्यत रणाजिरे ॥५५॥
प्रसर्पतोऽग्रतो वेगाद् मस्तकं द्विष उच्चकैः ।
सपद्येव विनिष्कृत्तं न्यपतद् धरणीतले ॥५६॥
यो यः शस्त्रधरो बाहुरीषदुच्चैरदृश्यत ।
न्यपात्यत स्फुरत्खड्गाघातेन स स भूतले ॥५७॥
समूहशोऽग्रतः सर्तुं यतमाना द्विषद्गणाः ।
बृहच्छिलाघनाघातैर्विलुण्ठन्तोऽपतन्नधः ॥५८॥
उच्चैरारोढुमध्वानं नाशक्नोत् स द्विषद्गणः ।
प्रोच्छलन्नपि वेगेन प्रवाह इव पर्वतम् ॥५९॥
अल्पिष्ठया तया चम्वा कुण्ठितारिवरूथिनी ।
बभासे दीपभासेव विनिरुद्धा निशीथिनी ॥६०॥
स प्रापदरिसंमर्दो वैक्लव्यं भूरि मर्दनैः ।
भार्गवस्य शराघातैः क्रौञ्चवानिव मार्दवम् ॥६१॥
क्षिप्ता म्लेच्छगणर्वेगात् तस्मिन् वीरगणे लघौ ।
शस्त्राघाता वृथाऽभूवन्नलाता इव पल्वले ॥६२॥
अशक्ताः पुरतः सर्तुं प्रादेशान्तरमप्यमी ।
अवाच्यवादैरन्योन्यमनिन्दन्नरयो भृशम् ॥६३॥
प्रस्कन्द्यमानामात्मीयामवलोक्य वरूथिनीम् ।
म्लेच्छसेनाधुरीणानामन्तर्भीत्याऽतिजग्रसे ॥६४॥
असृग्लोहितसर्वाङ्गं विद्युद्दीप्रविलोचनम् ।
भ्राम्यत्खड्गयुगं वाजि कालाग्निं मेनिरेऽरयः ॥६५॥
उद्दीपयन्त्यः स्वान् वीरांस्तदुदीर्णा हि घोषणाः ।
धीराणामपि शत्रूणां हृदयानि व्यदारयन् ॥६६॥
सर्वात्मनाऽरिविध्वंसे बाजिर्व्यग्रोऽपि सन्ततम् ।
शतघ्नीध्वनिमेकं तं श्रोतुमैच्छत् क्षणे क्षणे ॥६७॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

श्वेतपत्रिका संस्कृतं च

भारतवर्षे विविधानि राज्यशासनानि। तत्र महाराष्ट्रशासनं प्रगतम् इति ख्यातम्। तां ख्यातिम् अनुसृत्य शैक्षणिकनीतौ आमूलाग्रं परिवर्तनार्थं शिक्षामन्त्रिभिः प्रसारिता श्वेतपत्रिका। इयं श्वेतपत्रिका माध्यमिकविद्यालयेषु पुनश्च यथापूर्वम् आङ्ग्लभाषाध्ययनं वर्षाष्टकं पुरस्करोति। मातृभाषां 'मराठीं' माध्यमत्वेन प्रमाणयति। समाजस्य सर्वेषु स्तरेषु समानया इयत्तया विद्यावितरणं चिकीर्षति। संस्कृतं तु केवलम् उत्तेजनार्हत्वेन समुल्लिखति।

श्वेतपत्रिकायां नामोल्लेखमात्रं संस्कृतं महाराष्ट्रविद्याक्षेत्रात् समूलम् उन्मूलितप्रायम् इति साक्षात्कृत्य अस्माकं मुम्बापुरीनिवासिभिः पं. ल. म. चक्रदेव, पं. श्री. धुं. कवीश्वर–प्रा. रं. रा. देशपाण्डेप्रभृतिभिः मित्रोत्तमैः संयोजितं महाराष्ट्रसंस्कृतसंमेलनम्। ९ जून ६८ भानुवासरे आप्रातः आसायं तत्र संमिलितैः संस्कृतहितैषिभिः सोरस्ताडं सक्रोधं च धिक्कृतं शासनं संस्कृतस्य उपेक्षां निमित्तीकृत्य।

'शारदा'काराः संमेलने समुपस्थिताः। तेषां मतेन संस्कृतऱ्हासविषये न केवलं शासनं दूष्यम्। सांप्रतिके लोकतन्त्रे राज्ये यथा प्रजा तथा राजा (शासनम्) इति स्थितिः। समाजमानसे संस्कृतविषये बद्धमूलां काठिन्यविषयिणीं भीतिं, संस्कृतं विशिष्टसमाजग्राह्यम् ब्राह्मण्यप्रतीकं च इति भ्रान्ति दूरीकर्तुं यदि दत्तचित्ताः संस्कृतसेवकाः स्युः तर्हि निष्प्रयोजनं स्यात् तादृशम् अरण्यरुदनं गतं संस्कृतं नष्टं संस्कृतम् इति। संस्कृतहिताहितं शासनाधारमात्रम् इति लज्जास्पदम्। भारतधर्मसंस्कृतिप्राणभूतं विश्ववन्द्यं संस्कृतं शासनेन नादृतं चेत् तस्य अधःपातः सुनिश्चितः। न तदर्थं कस्यचन भविष्यवाणी प्रतीक्षणीया। परम् अन्ततो गत्वा शासनं लोकाधीनम्। लोकानां संस्कृताधीनता संस्कृतप्रियता संपादनीया। तदर्थं सर्वासु दिक्ष आचारणे, उच्चारणे, विचारणे च सुदृढीक्रियतां संस्कृतम्। जनताजनार्दनस्य हृदयमन्दिरे प्रज्वालितः संस्कृतस्य नन्दादीपः, श्वेतपत्रिकाशतम् आगच्छतु यावच्चन्द्रदिवाकरौ विश्वमण्डले प्रकाशमानः स्थास्यति। का वार्ता तत्र कृष्णहृदयस्य क्षुद्रशासनस्य। तदपि तत्प्रकाशस्नातं शुद्धीभूतं स्वयं पवित्रितम् इतरान् उद्धरिष्यति। परं तदर्थम् अलम् अरण्यरुदितेन। स्वात्मा निरीक्ष्यताम्। संस्कृतं प्रसार्यताम्। शासनं स्वायत्तीक्रियताम्। अयमेव मार्गः। त्वर्यताम्।

* * *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शारदा–(पुण्यपत्तनम् २.) ९ : १७-१८ * रजि. क्र. एम्. एच्. ५५७
• लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

अनुगृहीताः डॉ. वर्णेकराः शारदापीठ 'श्री'चरणैः ।

शृङ्गेरीशारदापीठ 'श्री'चरणाः

महाकविः डॉ. श्री. भा. वर्णेकरः

श्रीशिवराज्योदयमहाकाव्यं श्रुत्वा परमसंतुष्टैः शृङ्गेरी-शारदापीठ-'श्री'चरणैः डॉ. श्री. भा. वर्णेकराः महावस्त्र-विशेष-समर्पणेन अनुगृहीताः । शृङ्गेरी-श्रीशारदाम्बा-प्रसाद-वितरणम् इदं स्वयं शारदाकारैः तथा सौ. वर्णेकर कमलादेवी इत्येताभिः प्रत्यक्षीकृत्य बहुमानस्य संपादनार्थं हार्दम् अभिनन्दिताः डॉ. वर्णेकराः । श्रीशिवराज्योदयं महाकाव्यं ६८ तमस्य राज्याभिषेकवर्णनपरस्य सर्गस्य लेखनेन समाप्ततां नीत्वा कृतकृत्याः डॉ. वर्णेकराः प्रार्थिताः सन्ति शारदाकारैः भगवत्पूज्यपादानाम् आद्यश्रीशंकराचार्याणां विषये महाकाव्य-लेखन-सेवार्थम् । प्रार्थनाम् इमाम् आदृत्य महाकविभिः प्रा. वर्णेकरैः शृङ्गेरी-प्रत्यक्ष-दर्शनेन प्रारब्धा महाकाव्यसाधना इति सानन्दं प्रकटीकुर्मः । संपादकः ।

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम् – यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम् – १. म. म. प्रा. द. वा. पोतदार, ४९८ शनिवार, पुण्यपत्तनम् २
२. श्री. ल. म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४
कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri